दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-139 | 1 | मार्च 11, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com


**पञ्चाङ्गम्**

अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ बसन्त-ऋतुः
सूर्यः उत्तरायणम् चैत्रकृष्णाष्टमी
फाल्गुण 27 प्रविष्टांशः मङ्गलमयः भवेत्


2 हिमाचलप्रदेशस्य मुख्यमन्त्रिणा आईएसबीटी टूटीकंडीतः 'प्री-पेड' टैक्सी-सेवा प्रारब्धा

3 पश्चिम-एशिया-सङ्घर्षस्य प्रभावः हिमाचले; 'लघु-इस्रायल' (Mini Israel) इति ख्यातानि पर्यटनस्थलानि शून्यानि

4 कुमारभास्करवर्मा- संस्कृत-पुरातनाध्ययन- विश्वविद्यालये ग्रन्थोन्मोचनम्


## सर्वोच्चन्यायालयेन निर्वाचक-सूच्यां प्रचलिते विशिष्ट-गहन-संशोधने संलग्नानां न्यायिक अधिकारिणां कृते पूर्ण-व्यवस्थात्मक-समर्थनं दातुं आदिष्टौ

**हिमसंस्कृतवार्ताः** - सर्वोच्चन्यायालयेन भारतस्य निर्वाचनायोगः, पश्चिमबङ्गाल-सर्वकारः च राज्ये निर्वाचक-सूच्यां प्रचलिते विशिष्ट-गहन-संशोधने संलग्नानां न्यायिक अधिकारिणां कृते पूर्ण-व्यवस्थात्मक-समर्थनं दातुं आदिष्टौ। भारतस्य मुख्यन्यायाधीशः सूर्यकान्तः इत्यस्य नेतृत्वे न्यायाधीशत्रयस्य पीठः अवदत् यत् न्यायिक अधिकारिणः पूर्वमेव मतदातृ-सूचीतः निष्कासनस्य जनानां दश-लक्षतः अधिकान् आक्षेपान् अभियोगान् च सम्मुखीकृतवन्तः।

## कृषकाणां लाभाय, खाद्यधान्यानां उत्पादनं वर्धयितुं च अनेकाः कृषि-कार्योद्धार-नीतयः च आनीताः- शिवराजसिंहचौहानः




**हिमसंस्कृतवार्ताः** - केन्द्रीयकृषिमन्त्री शिवराजसिंह चौहानः अवदत् यत् विगतदशवर्षेषु देशे खाद्यान्नस्य उत्पादनं 44 प्रतिशतं वर्धितम् । श्रीचौहानः लोकसभायां प्रश्नोत्तरकाले अनुपूरकानाम् उत्तरं प्रायच्छत्। सः अवदत् यत्, प्रधानमन्त्री नरेन्द्रमोदी-वर्यस्य नेतृत्वे कृषकाणां लाभाय, खाद्यधान्यानां उत्पादनं वर्धयितुं च अनेकाः कृषि-कार्योद्धार-नीतयः च आनीताः सन्ति। मन्त्रिवर्यः अवदत् यत् भारतं चीनदेशम् अतिक्रम्य विश्वस्य बृहत्तमं तण्डुलोत्पादकम् अभवत्। श्रीचौहानः अवदत् यत्, खाद्यान्नस्य उत्पादनस्य सन्तुलितवृद्धिं सुनिश्चेतुं सम्पूर्ण देशे शत-मण्डलेषु प्रधानमन्त्री-धन-धन्या-योजना प्रवर्तिता अस्ति। सः अवदत् यत् पश्चिमबङ्ग-सर्वकारेण इयं योजना न प्रवर्तिता। मन्त्रिवर्यः अवदत् यत्, राज्यस्य चत्वारि मण्डलानि पुरुलिया, दार्जलिङ्ग, अलिपुर्दुवार, झारग्राम च अस्य कार्यक्रमस्य अन्तर्गतं कृषकाणां साहाय्यं कर्तुं उत्पादनं वर्धयितुं च विचितानि सन्ति । श्रीचौहानः अवदत् यत्, कृषकाणां कृते उर्वरकं सुलभं कर्तुं केन्द्रेण गतवर्षे एकदशमलव षडशीति-लक्ष-कोटिरूप्यकाणां उर्वरकस्य अनुदानं प्रदत्तम्।

## LPG इत्यस्य उत्पादनं वर्धयितुं गृहोपभोक्तृभ्यः, चिकित्सालयेभ्यः, शिक्षणसंस्थानेभ्यः च अस्य आपूर्तिं प्रथमं प्रदातुं च तैलनिर्मातृसंस्थानैः विशिष्टाः पदक्षेपाः उत्थापिताः सन्ति



**हिमसंस्कृतवार्ताः** - हिंदुस्तान-पेट्रोलियम-कॉर्पोरेशन लिमिटेड, भारत पेट्रोलियम च अकथयताम् यत् LPG इत्यस्य उत्पादनं वर्धयितुं गृहोपभोक्तृभ्यः, चिकित्सालयेभ्यः, शिक्षणसंस्थानेभ्यः च अस्य आपूर्ति प्रथमं प्रदातुं च विशिष्टाः पदक्षेपाः उत्थापिताः सन्ति। एकस्मिन् सार्वजनिकसङ्घालीयसंदेशे, तैलसंस्थानानि अकथयन् यत् औद्योगिकक्षेत्राणां याचनां ऑयल-मार्केटिंग-संस्थानानां अध्यक्षाणाम् एका समितिः पुनरालोकयिष्यति। तैलनिर्मातृसंस्थानानि अकथयन् यत् अन्यक्षेत्राणाम् आवश्यकतायै निर्मितायै समितये indanecareho@indianoil.in, edlpg@bharatpetroleum.in, lpg.sbu.head@hpcl.in इत्यादिषु ईमेलमाध्यमेन सूचना प्रदातुं शक्यते।

## केन्द्रीयमन्त्रिमण्डलेन जल-जीवन-मिशन इति अभियानम् अष्टविंशत्यधि-द्विसहस्रतमाब्दस्य दिसम्बरमासं यावत् वर्धयितुं स्वीकृतिः प्रदत्ता।




**हिमसंस्कृतवार्ताः** - केन्द्रीयमन्त्रिमण्डलेन जल-जीवन-मिशन इति अभियानम् अष्टविंशत्यधि-द्विसहस्रतमाब्दस्य दिसम्बरमासं यावत् वर्धयितुं स्वीकृतिः प्रदत्ता। नवदेहल्यां प्रसारमाध्यमैः सह वार्ता कुर्वन् सूचना-प्रसारण मंत्री अश्विनीवैष्णवः अकथयत् यत् प्रधानमंत्री नरेंद्रमोदी इत्यस्य अध्यक्षतायां केन्द्रीय-मन्त्रिमण्डलेन जल-शक्ति-मंत्रालयस्य तदीयं प्रस्तावं स्वीकृतम् अस्ति यस्मिन् जल-जीवन-मिशन इति अभियानं अवसंरचनायै प्रयोक्तुं सेवाप्रदाने परिवर्तयितुं प्रख्यापितुं च पुनः कार्य समारब्धुं प्रस्तावः अस्ति ।


## लोकसभायां लोकसभाध्यक्षं ओम बिरला इत्येतं पदच्युतं कर्तुं प्रस्तावे चर्चा समारब्धा अस्ति




**हिमसंस्कृतवार्ताः** - लोकसभायां लोकसभाध्यक्ष ओम बिरला इत्येतं पदच्युतं कर्तुं प्रस्तावे चर्चा समारब्धा अस्ति। कांग्रेसदलस्य सांसदः डॉ. मोहम्मद जावेद इत्यसौ एतं प्रस्तावं प्रस्तुतवान्, यदा सदनं प्रथमस्थगनानन्तरं द्वादशवादने समारब्धम्। सः अकथयत् यत् विरलावर्येण विपक्षस्य नेतृन् सदने वक्तव्यस्थापनस्य अवसरं न प्रायच्छत् अपि च विपक्षिदलानां महिलासांसदाः विरुध्य अपि मिथ्यारोपाः प्रख्यापिताः। सः अकथयत् यत् बिरलावर्यः सदने समेषां वर्गाणां विश्वासं जेतुमपि असमर्थः आसीत्। तरुणगोगोई इत्यसौ अकथयत् यत् एषः प्रस्तावः सदनस्य गरिमायाः रक्षायै प्रस्थापितः अस्ति न तु वैयक्तिकरूपेण बिरलावर्यं विरुध्य ।

## राष्ट्रीयशैक्षणिकानुसन्धान-प्रशिक्षणपरिषदा अष्टमकक्षायाः नवप्रकाशितस्य पुस्तकस्य द्वितीयभागस्य प्रकाशनं निरस्तीकृतम्

**हिमसंस्कृतवार्ताः** - राष्ट्रीयशैक्षणिकानुसन्धान-प्रशिक्षणपरिषदा अष्टमकक्षायाः नवप्रकाशितस्य पुस्तकस्य द्वितीयभागस्य प्रकाशनं निरस्तीकृतं अस्ति यस्मिन् The Role of Judiciary in our Society इत्याख्यः चतुर्थः पाठः सम्मिलितः आसीत् । सार्वजनिकरूपेण क्षमायाचनं कुर्वता परिषदा प्रोक्तं यत् समग्रमपि प्रकाशितं पुस्तकं अधुना निरस्तीकृतम् अस्ति ।



10 March 2026

PRESS RELEASE

Public Apology

National Council of Educational Research and Training [NCERT] has recently published a social science text book "Exploring Society: India and Beyond" Grade 8 (Part -II) which contained Chapter IV titled "The Role of Judiciary in our Society".

The Director and Members of NCERT hereby tender an unconditional and unqualified apology for the said Chapter IV. The entire book has been withdrawn and is not available.

## सुभाषितम्

**वृत्तं यत्नेन संरक्षेद्, वित्तमेति च याति च।**
**अक्षीणो वित्ततः क्षीणो, वृत्ततस्तु हतो हतः॥**

भावार्थः- मनुष्य को यत्नपूर्वक सदाचार की रक्षा करनी चाहिए, धन तो आता जाता रहता है। वस्तुतः धन से क्षीण मनुष्य क्षीण नहीं परन्तु सदाचार और परिवार से मिले अच्छे संस्कारों से विहीन मनुष्य क्षीण और दरिद्र है।


दैनिक ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263



सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य समुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्


## अमेरिकादेशस्य राष्ट्रपतिना डोनाल्ड ट्रम्पः इत्यनेन रूसदेशस्य राष्ट्रपतिना व्लादिमिर पुतिन इत्यनेन सह दूरभाषया वार्तालापः कृतः

**हिमसंस्कृतवार्ताः** - अमेरिकादेशस्य राष्ट्रपतिना डोनाल्ड ट्रम्पः इत्यनेन रूसदेशस्य राष्ट्रपतिना व्लादिमिर पुतिन इत्यनेन सह दूरभाषया वार्तालापः कृतः। पुतिन-वर्यस्य कूटनीतिक परामर्शदः यूरी-उशाकोव इत्येषः अवदत् यत्, दिसम्बर-मासात् आरभ्य प्रथमायां वार्तायां द्वयोः मध्ये एकहोरायाः वार्तालापः अभवत्, वाशिङ्गटनं च चर्चायै याचितवान्। उशाकोव इत्ययम् अवदत् यत् राष्ट्रपतिः पुतिनः, इरान-देशं विरुद्ध्य अमेरिका-इजरायलयोः प्रहारस्य उपशमनं विधातुं त्वरितराजनैतिकं कूटनीतिकं च समाधानस्य आह्वानम् अकरोत् ।

# हिमाचलप्रदेशस्य मुख्यमन्त्रिणा आईएसबीटी टूटीकंडीतः 'प्री-पेड' टैक्सी-सेवा प्रारब्धा



**हिमसंस्कृतवार्ताः- शिमला।** मुख्यमन्त्री सुखविन्दरसिंह सुक्खुवर्येण मङ्गलवासरे शिमलायाः अन्तरराज्यीय-बसस्थानकात् (आईएसबीटी टूटीकंडी) राज्यस्य कृते 'प्री-पेड' टैक्सीसेवायाः शुभारम्भः कृतः। अस्याः सुविधायाः अन्तर्गतं यात्रिणः आईएसबीटी टूटीकंडी स्थितात् प्री-पेड टैक्सी-काउण्टरतः टैक्सीयानम् आरक्षितं कर्तुं शक्नुवन्ति। काउण्टरमध्ये शुल्कप्रदानानन्तरं ग्राहकाय एका प्रदानाभिलेख-पत्रिका (payment slip) प्रदास्यते, या टैक्सी-चालकाय दर्शयितुं अनिवार्या भविष्यति।

तदनन्तरं चालकः यात्रिणं निर्धारित-गन्तव्यस्थानं प्रापयिष्यति। स्थानकं प्रत्यागमनानन्तरं चालकः तां पत्रिकां काउण्टरमध्ये समर्पयिष्यति, यात्रायाः मूल्यं प्राप्स्यति। शुल्कं पूर्वमेव दत्तं भविष्यति, अतः यात्रिणां शुल्कविषये चालकैः सह कश्चिद् विवादः न भविष्यति। इयं सेवा शिमलानगरस्य २६ स्थानानि व्याप्स्यति, चण्डीगढ़- अन्तर्राष्ट्रीय- विमानपत्तनं चण्डीगढ़नगरं च अस्मिन् सम्मिलितं अस्ति। अस्यां सेवायां ११५ वाहनानि भविष्यन्ति, येषां सञ्चालनम् टैक्सी-यूनियन द्वारा करिष्यते।

मुख्यमन्त्रिणा उक्तं यत् इयं योजना पारदर्शितां सुनिश्चितां करिष्यति यतः भाटकदराः परिवहन- विभागेन अधिसूचिताः सन्ति। अनेन यात्रिणां सुरक्षा वर्धिष्यते, पर्यटकानां स्थानीयनिवासिनां च लाभः भविष्यति।

**प्री-पेड टैक्सीशुल्कं 3000 रूप्यकाणि निर्धारितम्**

हिमाचलप्रदेशसर्वकारेण शिमलातः चण्डीगढ़पर्यन्तं चलन्तीनां प्री-पेड टैक्सी-यानानां शुल्के संशोधनं कृत्वा नूतनाः दराः अधिसूचिताः। अतिरिक्त- मुख्यसचिवेन (परिवहन) आर.डी. नजीम महोदयेन इयं अधिसूचना निर्गता।

• शिमला (आईएसबीटी) तः चण्डीगढ़ नगरम्: न्यूनतमं शुल्कं 3000 रूप्यकाणि, अधिकतमं च 5000 रूप्यकाणि निर्धारितम्।

• शिमलातः चण्डीगढ़ विमानपत्तनम्: न्यूनतमं शुल्कं 3500 रूप्यकाणि, अधिकतमं च 5500 रूप्यकाणि निर्धारितम्।

परिवहन-विभागानुसारम् एताः संशोधितदराः 'बिन्दुतः बिन्दु' (point-to-point) आधारेण प्रभाविण्यः भविष्यन्ति। अनेन यात्रिभ्यः पूर्वमेव निश्चितशुल्कस्य सुविधा मिलिष्यति। अत्यधिक- शुल्क-वसूली-सम्बद्धानां शिकायतानां निवारणं भविष्यति। अधिकारिणाम् अनुसारम् एताः नूतनाः दराः सद्यः एव प्रवर्तन्ते।

# हिमाचलस्य त्रिंशत्तमः (३०) राज्यपालः अभवत् कविन्द्रगुप्तः; हिन्द्यां कृतं शपथवाचनम्



**हिमसंस्कृतवार्ताः- शिमला।** लोकभवने आयोजिते गरिमापूर्णे समारोहे मङ्गलवासरे कविन्द्रगुप्तः हिमाचलप्रदेशस्य राज्यपालत्वेन शपथं गृहीतवान्। हिमाचलप्रदेश-उच्चन्यायालयस्य मुख्यन्यायाधीशः न्यायमूर्तिः गुरमीतसिंहसन्धावालिया तस्मै पदस्य गोपनीयतायाश्च शपथं कारितवान्। अनेन सह कविन्द्रगुप्तः हिमाचलस्य त्रिंशत्तमः (३०) राज्यपालः जातः। सः हिन्दीभाषायां शपथं गृहीतवान्। अस्मिन् अवसरे हरियाणायाः राज्यपालः प्रो. असीमकुमारघोषः, तस्य पत्नी मित्रा घोष, मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः लेडी गवर्नर बिन्दुगुप्ता च उपस्थिताः आसन्। लोकभवने प्रथमवारं समारोहस्य आरम्भः 'वन्दे मातरम्' गायनेन अभवत्, तदनन्तरं राष्ट्रगानं गीतम्। समापनमपि 'वन्दे मातरम्' गायनेन सह अभवत्। अस्मिन् अवसरे राज्यपालस्य कृते 'गार्ड ऑफ ऑनर' अपि प्रदत्तम्।अस्मात् पूर्वं मुख्यसचिवः सञ्जयगुप्तः भारतस्य राष्ट्रपतिना निर्गतं नियुक्तिपत्रम् ('वारंट ऑफ अपॉइंटमेंट') पठित्वा श्रावितवान्। राज्यपालस्य सचिवः सी. पी. वर्मा महोदयः राज्यपालेन कार्यभारग्रहण-प्रमाणपत्रे हस्ताक्षरं कारितवान्। शपथग्रहणात् पूर्वं प्रातःकाले कविन्द्रगुप्तः स्वपरिजनैः सह पूजा-अर्चनाम् अपि अकरोत्। अस्मिन् अवसरे सः माध्यमैः सह वार्तालापमपि कृतवान्। अस्मिन् संवैधानिकपदे नियुक्त्यर्थं राष्ट्रपतये कृतज्ञतां प्रकटयन् राज्यपालः अवदत् यत् सः संविधानुसारं कार्यं करिष्यति राज्यसर्वकारेण सह च समन्वयम् स्थापयिष्यति। सः अकथत्, "राज्यपालस्य पदं काचित् संवैधानिक- उत्तरदायित्वमस्ति। राज्यपालः केनापि राजनैतिकदलेन सम्बद्धः न भवति, सः राज्यस्य समाजस्य च समग्रविकासाय कार्यं करोति।"

कविन्द्रगुप्तः अवदत् यत् सः पूर्वराज्यपालैः आरब्धानि नवीनकार्याणि अग्रे नेष्यति तथा मुख्यमन्त्रिणः सहयोगेन तानि पूर्णानि करिष्यति। सः अकथत् यत् हिमाचलं शिक्षाक्षेत्रे अग्रणीराज्यम् अस्ति, अतः सः शिक्षायाः गुणवत्तावर्धने विशेषध्यानं दास्यति। लद्दाखस्य उपराज्यपालत्वेन स्वानुभवं स्मरन् सः अवदत् यत् हिमाचलस्य भौगोलिकपरिस्थितयः जम्मू-कश्मीर-लद्दाखसदृशाः एव सन्ति। सः उक्तवान्, "लद्दाख-कार्यकाले मया सप्तसु मासेषु १०,००० किलोमीटरतः अधिका यात्रा कृता, अहं च पर्वतीयक्षेत्राणाम् आह्वानेभ्यः परिचितः अस्मि।" सः हिमाचलवासिनां आतिथ्यभावेन भृशं प्रभावितः अस्ति।

## राज्यपालस्य प्राथमिकाः विषयाः

१. पर्यावरणं संस्कृतिश्चः- पर्यावरणसंरक्षणम् (विशेषतः हरितक्षेत्रस्य विस्तारः), सांस्कृतिक- विरासतस्य रक्षणं, धार्मिकपर्यटनस्य च सुदृढ़ीकरणम्।

२. शिक्षाः- गुणवतापूर्णशिक्षा, कौशलविकासः, राष्ट्रिय-शिक्षानीतेः (NEP) प्रभावी कार्यान्वयनम्।

३. समाजकल्याणम्:- जनजातीयविकासः, प्राकृतिककृषिः, युवकल्याणं, नशामुक्ति- अभियानस्य च सुदृढ़ीकरणम्।

४. आधारभूतसंरचनाः- केन्द्रसर्वकारस्य योजनानां माध्यमेन दूरस्थक्षेत्रेषु मार्गसम्पर्कस्य उत्तमव्यवस्था।

५. सीमाक्षेत्रविकासः- चीनदेशेन सह लग्नेषु सीमाक्षेत्रेषु 'वाइब्रेंट विलेज प्रोग्राम' (Vibrant Village Program) सदृशाणां योजनानां प्रोत्साहनम्।

६. आरोग्यम्:- राज्ये क्षयरोग (TB) निर्मूलनस्य लक्ष्यप्राप्तये विशेषप्रयासाः। राज्यपालः विश्वासं प्रकटितवान् यत् राज्यसर्वकारस्य, पक्ष-विपक्षयोः, सामाजिकसंस्थानां सहयोगेन हिमाचलप्रदेशः समावेशी- सतत- विकासस्य नूतनशिखराणि प्राप्स्यति।

# विना पुस्तकानि सीबीएसई-विद्यालयेषु कथं पठिष्यन्ति छात्राः? सर्वत्र अव्यवस्थायाः वातावरणम्- जयरामठाकुरः



**हिमसंस्कृतवार्ताः- शिमला।** पूर्वमुख्यमन्त्री विपक्षस्य नेता च जयरामठाकुरः अवदत् यत् सर्वकारेण गतवर्षद्वयात् प्रदेशस्य बहून् विद्यालयान् सीबीएसई (CBSE) इति प्रणाल्यां परिवर्तयितुं घोषणा कृता आसीत्। एतावान् समयः व्यतीतः चेदपि, विना सज्जतां केषुचित् विद्यालयेषु सीबीएसई-अन्तर्गतं शिक्षणम् आरब्धम्। मासैकः व्यतीतः तथापि सर्वकारः छात्रेभ्यः पाठ्यपुस्तकानि अपि उपलब्धं कर्तुं न शक्तवान्। अस्मात् कारणात् छात्राः पुस्तकं विना एव अध्ययनं कर्तुं विवशाः सन्ति। मार्चमासस्य अन्ते छात्राणां 'फॉर्मेटिव एसेसमेंट' (रचनात्मक-मूल्याङ्कनम्) भवितव्यम् अस्ति, किन्तु अद्यापि पुस्तकानि न प्राप्तानि। विद्यालयाः छात्रान् हिमाचलप्रदेश- शिक्षा- मण्डलस्य पुस्तकानुसारेण पाठयन्तः सन्ति। समये पुस्तकानि प्रदातुं स्थाने उत्तरदायीभिः व्यक्तिभिः एषः तर्कः दीयते यत् सीबीएसई- हिमाचल-मण्डलयोः पाठ्यक्रमाः समानाः एव सन्ति। जयरामठाकुरः अवदत् यत् सर्वकारेण ईदृशानां तर्कहीन-कथनानां स्थाने समये पाठ्यपुस्तकानां वितरणे ध्यानं दातव्यम्। सीबीएसई-विद्यालयानां नाम्ना कुत्रापि स्पष्टता नास्ति। अद्यापि शिक्षकाणां स्थानान्तरणम् अपि न जातम्। पूर्वं ये शिक्षकाः हिमाचल-मण्डलीये विद्यालये पाठयन्ति स्म, ते एव अधुनापि पाठयन्तः सन्ति। आश्चर्यस्य विषयः एषः अस्ति यत् प्रत्येकं सीबीएसई-विद्यालये केचन शिक्षकाः तादृशाः सन्ति ये अस्यां प्रणाल्यां कार्यं कर्तुं नैच्छन्ति। सीबीएसई-विद्यालयार्थं शिक्षकाणां परीक्षायै सर्वकारेण २२ मार्च दिनाङ्कः निर्धारितः अस्ति। यदि निर्दिष्टे दिनाङ्के एषा परीक्षा भवति, तर्हि अस्याः प्रक्रियायाः पूर्णतायै मासावधिः समयः अपेक्षते। काङ्ग्रेस-सर्वकारेण चिताः अधिकांशाः विद्यालयाः 'पीएम-श्री' योजनान्तर्गताः सन्ति, अतः तत्र आधारभूत-संरचनायाः (Infrastructure) अभावः नास्ति, किन्तु विना शिक्षकैः पुस्तकैश्च कथं पाठयिष्यते, अस्य उत्तरं सर्वकारस्य पार्श्वे नास्ति।

# आहारमेलकम् उद्घाटितवान् वाणिज्य-उद्योग-मन्त्री पीयूष गोयलवर्यः

**हिमसंस्कृतवार्ताः -** वाणिज्य-उद्योग-मन्त्री पीयूष गोयलवर्यः नवदेहल्याम् आहार-अन्ताराष्ट्रिय-खाद्य-आतिथ्य-मेलकम् इत्यस्य चत्वारिंशत्तमं संस्करणम् उद्घाटितवान्। खाद्यसंस्करण उद्योगमन्त्रालयेन, भारत-व्यापार-प्रोत्साहन-सङ्घटनेन च सम्मिल्य अस्य मासस्य दशदिनाङ्कतः चतुर्दश-दिनाङ्कपर्यन्तं संयुक्तरूपेण अस्य मेलकस्य आयोजनं क्रियते। प्रसारमाध्यमैः सह वार्तालापं कुर्वन्, मन्त्रिवर्यः आत्मविश्वासं प्रकटितवान् यत् एतादृशानि प्रदर्शनानि भारताय लाभप्रदानि भविष्यन्ति।

# पश्चिम-एशिया-सङ्घर्षस्य प्रभावः हिमाचले; 'लघु-इस्रायल' (Mini Israel) इति ख्यातानि पर्यटनस्थलानि शून्यानि



**हिमसंस्कृतवार्ताः- शिमला।** पश्चिम-एशियायाम् उत्पन्नेन संघर्षेण हिमाचलप्रदेशस्य येषु पर्यटनक्षेत्रेषु इस्रायली-पर्यटकाः बहुसङ्ख्यया आगच्छन्ति, तत्र प्रतिकूलः प्रभावः दृश्यते। एतेन सह सम्बद्धाः व्यावसायिकाः राज्ये विदेशी-पर्यटकाणां न्यूनसङ्ख्यां प्रति चिन्तां प्रकटयन्ति। कुल्लू-जनपदस्य कसोल, तोश, पुरातन- मनाली सदृशानि 'बैकपैकर' स्थलानि, काङ्ग्ड़ा-जनपदस्य धर्मकोटः च दीर्घकालात् इस्रायली-यात्रिणां प्रियस्थानानि सन्ति। गतेषु वर्षेषु, विशेषतः पार्वती-घाटी-क्षेत्रे एतासु पर्वतीय-बस्तिषु विशिष्टा 'बैकपैकर' संस्कृतिः विकसिता, या 'लघु-इस्रायल' (Mini Israel) इति नाम्ना अनौपचारिकरूपेण प्रसिद्धा अस्ति।

दशकेभ्यः इस्रायली-पर्यटकाः (येषु अनेके स्वदेशस्य अनिवार्य-सैन्यसेवां समाप्य विदेशं गच्छन्ति) हिमालयस्य क्षेत्रेषु दीर्घकालं यावत् वासं कर्तुं रोचन्ते। अल्पकालीनानां पर्यटकाणां अपेक्षया एते 'बैकपैकर' यात्रिणः प्रायः सप्ताहत्रयं वा मासपर्यन्तं वा हिमाचले निवसन्ति, येन स्थानीय- पर्यटन- अर्थव्यवस्थायां निरन्तरं योगदानं भवति। कसोल-तोश सदृशेषु स्थानेषु 'हिब्रू' (Hebrew) भाषायाम् अङ्कितानि सूचनापट्टानि, शाकशुका- फलाफल (Shakshuka and Falafel) सदृशानि इस्रायली-व्यञ्जनानि प्रदातारः उपहारगृहाः (Cafes), केवलम् इस्रायली- यात्रिभ्यः निर्मिताः अतिथिशालाः (Guest houses) सामान्याः सन्ति।

'हॉलिडे मार्ट' इत्यस्य स्वामी अशोक शर्मा अवदत् यत् यथा- यथा युद्धं तीव्रं भवति, केचन इस्रायली-पर्यटकाः स्वदेशं प्रत्यागन्तुं शीघ्रं 'आरक्षणं' कुर्वन्ति। तस्यानुसारं, अनेन राज्यस्य लघु-मध्यम-श्रेण्याः होटलानां व्यापारः प्रभावितः भवितुं शक्नोति। सः अपि उक्तवान् यत् तैलमूल्यानां वृद्ध्या पर्यटनव्यापारस्य सञ्चालनमूल्यं वर्धिष्यते। टैक्सी-चालकाः, ये पेट्रोल- डीजल- सीएनजी- वाहनेषु आश्रिताः सन्ति, पर्यटकाणां न्यूनतायाः कारणेन आर्थिकप्रभावं सोढुं शक्नुवन्ति।

हिमाचलप्रदेशे विदेशी-पर्यटकाणाम् आगमनं अधुनापि कोरोना-महामारी-सङ्कटात् बहिः आगन्तुं प्रयतते। २०१९ वर्षे राज्ये प्रायः ३.८२ लक्षं विदेशी-पर्यटकाः आगताः आसन्, ये २०२० वर्षे ४३,००० तथा २०२१ वर्षे केवलं ५,५०० अभवन्। एषा सङ्ख्या शनैः-शनैः वर्धिता। २०२२ वर्षे २९,०००, २०२३ वर्षे ६२,८०० तथा २०२४ वर्षे ८२,००० अभवत्। पर्यटन-विशारदाः वदन्ति यत् यद्यपि इस्रायली-पर्यटकाः सङ्ख्यादृष्ट्या बृहत्तमः समूहः न स्युः, तथापि तेषां दीर्घकालीन-वासस्य कारणेन कुल्लू-काङ्ग्ड़ा-क्षेत्राणां लघु- पर्यटन- व्यापाराणां कृते ते आर्थिकी दृष्टिना अतीव महत्त्वपूर्णाः सन्ति।

# उत्तराखण्ड-विधानसभायाम् 'देवभूमि-परिवार-विधेयक-2026' प्रस्तुतम्




हिमसंस्कृतवार्ता। उत्तराखण्ड-सर्वकारेण बजट-सत्रस्य अवसरे विधानसभायाम् "देवभूमि-परिवार-विधेयक-2026" इति प्रस्तुतम्। अस्य मुख्यम् उद्देश्यं जनकल्याणकारी-योजनानां प्रभावकारी क्रियान्वयनम् अस्ति। अस्मिन् विधेयके पारिते सति राज्ये एकं एकीकृतं प्रमाणीकृतं च परिवार-आधारितं 'डेटाबेस' (तथ्य-सञ्चयः) सज्जीकर्तुं शक्यते। अस्मिन् प्रपत्रे परिवारस्य 18 वर्षतः अधिकवयस्का वरिष्ठा महिला सदस्यैव गृहस्वामिनी (मुखिया) रूपेण अङ्किता भविष्यति। अस्याः प्राथमिकप्रक्रियायाः लक्ष्यं विभिन्न-सर्वकारीय-विभागेषु पञ्जीकृत-लाभार्थिनां तथ्यानां परस्परं संयोजनम् अस्ति। एतेन सर्वकारीय-योजनानां कार्यान्वयनम् अधिकं प्रभावशालि पारदर्शकं च भविष्यति। वर्तमानकाले सर्वे सर्वकारीय-विभागाः पृथक्-पृथक् लाभार्थि-सूचिकानां प्रयोगं कुर्वन्ति, येन तथ्यानां पुनरावृत्तिः, पुनः प्रमाणीकरणस्य क्लिष्टता, समन्वयस्य अभावः च इत्यादयः समस्याः उद्भवन्ति।

# हिमाचल- उच्च- न्यायालयस्य पञ्चायत- पुनर्सङ्घटने कठोरा टिप्पणी, एतत् तु अवबोधनात् परं निर्वाचनापेक्षया सीमानिर्धारणे संलग्ना सर्वकारः




**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेश-उच्चन्यायालयेन पञ्चायत- निर्वाचनानाम् अन्तिमसमये नूतनपञ्चायतानां सङ्टने पुरातनानां च पुनर्सङ्घटने निर्गतासु अधिसूचनासु सर्वकारं प्रति कठोरा टिप्पणी कृता। न्यायलयेन उक्तं यत् पञ्चायत-निर्वाचनानि सन्निकटानि सन्ति, सर्वकारः च अद्यापि पञ्चायतीराज-संस्थानां निर्वाचनक्षेत्राणां निर्धारणे व्यग्रः अस्ति। न्यायमूर्तिः विवेकसिंहठाकुरः न्यायमूर्तिः रञ्जनशर्मा च इत्यनयोः खण्डपीठेन उक्तं यत् ते एतत् अवबोधुं न शक्नुवन्ति यत् यदा पञ्चायतीराज-संस्थानां पञ्चवर्षाणां कार्यकालः पूर्वमेव समाप्तः, सर्वकारः च संवैधानिक-आदेशैः बद्धः अस्ति, तर्हि कथं निर्वाचनप्रक्रियाम् उच्चतम- न्यायालयस्य (Supreme Court) आदेशानुसारं ३१ मई दिनाङ्कपर्यन्तं पूर्णं न क्रियते? सर्वकारः किमर्थं अस्मिन् समये बृहत्स्तरे वार्ड-निर्धारणं, संस्थानां पुनर्सङ्घटनं, नूतनपञ्चायतानां च निर्माणं कुर्वन् अस्ति?

## दुर्भावनायाः आशङ्का भवितुं शक्नोति

न्यायालयस्य मतेन सर्वकारेण एतत् कार्यं समये न कृतम्। पीठेन टिप्पणी कृता यत् राज्यसर्वकारस्य ईदृश्या कार्यविधिना तस्य अभिप्रायस्य विषये अनुचितः सन्देहः भवितुं शक्नोति। राज्यसर्वकारेण तादृशं किमपि कार्यं न करणीयं, यत् पञ्चायत- निर्वाचने विलम्बस्य कारणं वा टालमटोल-नीतिः (Prevarication) वा मन्येत। समयस्य अभावात् शीघ्रतया स्वीकृतेषु निर्णयेषु ज्ञाताज्ञातेन वा त्रुटयः भवन्ति, येन न्यायपालिकायाः हस्तक्षेपस्य अवसरः वर्धते।

## मनलोग-बड़ोग-क्षेत्रस्य याचिकायां संज्ञानम्

उच्चन्यायालयेन एषा टिप्पणी अर्की- तहसील-अन्तर्गतस्य हनुमान- बड़ोग पञ्चायतस्य मनलोग- बड़ोग वार्डं दाड़लाघाट-पञ्चायते सम्मेलनस्य विरुद्धं प्रस्तावितां याचिकां स्वीकुर्वन् कृता। मनलोग-बड़ोग-ग्रामस्य 'नेहरू युवा क्लब' तथा 'महिला मण्डल' इत्येतैः सर्वकारस्य अधिसूचना आह्विता आसीत्।

## सर्वकारस्य कार्यविधिः निरर्थका

न्यायालयः सर्वकारस्य तां अधिसूचनां पूर्णतया निरस्तं (Annulled) अकरोत्, यस्यां मनलोग- बड़ोग ग्रामः हनुमान-बड़ोग पञ्चायतः पृथक् कृत्वा दाड़लाघाट-पञ्चायते संयोजितम् आसीत्। न्यायालयः याचिकां स्वीकुर्वन् अवदत् यत् सर्वकारस्य एषः निर्णयः स्पष्टतया स्वेच्छाचारी (Arbitrary), दोषपूर्णः, निरर्थकः तथा च तथ्यविरुद्धः अस्ति।

# प्रधानमन्त्रिणः केरल-तमिलनाडु-यात्रा-: विकासयोजनानां उपहारः निर्वाचनघोषश्च

प्रधानमन्त्री भारतीयजनतापक्षस्य वरिष्ठनेता च नरेन्द्रमोदी अवोचत् यत् सः अद्य केरलराज्यस्य एर्नाकुलम-नगरे तथा तमिलनाडुराज्यस्य तिरुचिरापल्ली-नगरे विभिन्नकार्यक्रमेषु भागं ग्रहीतुं सोत्सुकः अस्ति। श्रीमोदी सूचितवान् यत् केरलराज्ये सः मत्स्यजीविनां कल्याणाय कार्यरतायाः 'अखिल केरल धीवर सभा' इत्याख्यायाः संस्थायाः स्वर्णजयन्ती-समारोहे सम्मिलितः भविष्यति। तेन संस्थायाः कार्याणि प्रशंसितानि। अन्यस्मिन् कार्यक्रमे प्रधानमन्त्री राज्ये ऊर्जा-राजमार्ग-ग्रामीणाधारभूतसंरचना-रेलवे-इत्यादिभिः क्षेत्रैः सम्बद्धानां विभिन्नविकासकार्याणां लोकार्पणं शिलान्यासं च करिष्यति। अपराह्णे सः एर्नाकुलम-मण्डले 'राष्ट्रिय-लोकतान्त्रिक-गठबन्धनस्य' (NDA) जनसभाम् अपि सम्बोधयिष्यति। सः अवदत् यत् 'एनडीए' इत्यस्य सुशासन-कार्यसूची केरलस्य वामपन्थी-सर्वकारस्य तथा कांग्रेस-नेतृत्वस्य 'यूडीएफ' इत्यस्य लुण्ठन-कुशासनाभ्यां सर्वथा भिन्ना अस्ति। एनडीए विकासोन्मुख-राजनीतौ ध्यानं दत्त्वा राज्यस्य यूनाम् आकाङ्क्षाः पूरयिष्यति।

# कुमारभास्करवर्मा- संस्कृत- पुरातनाध्ययन- विश्वविद्यालये ग्रन्थोन्मोचनम्



हिमसंस्कृतवार्ताः- डॉ. निशिकान्तपाण्डेयः। असमप्रदेशे नलवारिजनपदे स्थिते कुमारभास्करवर्मा- संस्कृतपुरातनाध्ययन- विश्वविद्यालये "Indian Knowledge System: A Comprehensive Exploration" इति ग्रन्थस्योन्मोचनं जातम्। ग्रन्थोन्मोचनकार्यक्रमे उपस्थिताः आसन् विश्वविद्यालयस्य कुलपतिः प्रो. प्रह्लाद आर. जोशी, विश्वविद्यालयस्य सद्यनियुक्ता सम-उपचार्या अध्यापिकामल्लिकाकलिता, विश्वविद्यालयस्य भारप्राप्तपञ्जीयकः अध्यापकः विकाशभार्गवशर्मा च। प्राचीनभारतीय- बौद्धिक- सांस्कृतिक- मूलाधारमधिकृत्य च त्रिंशत् गवेषणामूलकप्रबन्धः लिखितमस्ति। अस्य ग्रन्थस्य सम्पादनं कृतवन्तः विश्वविद्यालयस्य साहित्यविभागस्य विभागध्यक्षः तथा संकायाध्यक्ष प्रो. रातुलबुजरवरुवा, विभागीय सहकारी अध्यापिका डॉ. नुरिमा इयास्मिन्।



✍ असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

## संस्कृतं मधुरं सदा - ०६


मनुष्यस्य अन्तःकरणे उद्भूतस्य विचारस्य सन्दर्भे अत्र किञ्चिच्चर्च्यते। विचारः द्विविधः भवति- सद्विचारः, दुर्विचारः चेति। विचारः मानसिकः क्रियाभूतः भवति। विचारकार्ये मनुष्यः पूर्णतः स्वतन्त्रोऽस्ति। विचारः एकः स्वयं निर्मितः जालवत् भवति। यदि कश्चन सद्विचाररूपं जालं निर्माति, सः स्वयं तत्रैव आबद्धो भवति। एवं यदि स दुर्विचारयुतं जालं निर्माति, तर्हि तस्मिन् जाले हि सः आबद्धः जायते। दुर्विचारे अभ्यस्तो जनः, तस्य प्रवाहे सहजतया प्रवहितुम् आरभते। तत्यक्त्वा स सद्विचारे रमणं कर्तुं नार्हति। दुर्विचारः असाध्यः जीर्णरोगसमानः, यश्च मनुष्यं विनाशं प्रति नयति। दुर्विचारः संक्रामको रोगोऽस्ति, यश्च शीघ्रं हि सर्वत्र व्याप्तः भवति, सर्वत्र दूषयति च। परन्तु सद्विचारः नन्दनवनवत् सुखदः भवति। सद्विचारकः जनः यत्र गच्छति, तत्र स्वस्थजीवनस्य विद्युच्छक्तिं सहैव नीत्वा गच्छति। जनान् सद्विचारे प्रवृत्तान् करोति, मार्गभ्रष्टानुद्दिश्य च मार्गदर्शनं करोति। सद्विचारद्वारा हि सभ्यतायाः, संस्कृतेः च उन्मेषः भवति । यस्मिन् समाजे सद्विचारस्य प्रभावः स्यात्, स समाजः शक्तिमान् कथ्यते, सः सत्प्रभावः महापुरुषान् उत्पादयति। सद्विचारस्य साधनं अनतिसाधारणम्, आश्चर्यकरं, महत्प्रभावयुतं च भवति। सद्विचारो हि विश्वशान्तेः, भ्रातृत्वबोधस्य च मुख्यकारणभूतः। संसाररूपे दर्पणे यदि असद्दृष्ट्या, पापदृष्ट्या वा अवलोक्यते, तर्हि असत्, पापमयं दृश्यं वा हि दृश्यते। एवञ्च पुण्यमयदृष्ट्या अवलोक्यते, तर्हि सर्वं पुण्यमयं जगद् दृश्यते। तस्मादुक्तमस्ति- "यादृशी भावना यस्य सिद्धिर्भवति तादृशी" इति। अतः लोकः सदैव सद्विचारं हि अपेक्षते इति, शम्।

॥ॐ॥

### "वन्दे संस्कृतमातरम्"
### "लौकिकन्यायकोशः"
### "करिकलभन्यायः"


करी नाम गजः। कलभः नाम गजशिशुः। कलभ इत्यनेन एव शब्देन गजशावकः इति अर्थः भवति तथापि करिकलभः इति कथनस्य किमपि प्रयोजनं नास्ति तथापि तादृशप्रयोगाः भाषायां दृश्यन्ते। क्वचित् पुनरुक्तपदानां किञ्चित् प्रयोजनं भवितुमर्हति।

**डा. वर्षा प्रकाश टोणगांवकर**
**पुणे / महाराष्ट्रम्**




**अर्थः** कार्य परिश्रम से ही सिद्ध होते हैं, केवल इच्छा करने से नहीं। जैसे सोए हुए शेर के मुंह में हिरण खुद प्रवेश नहीं करता।

**सन्देशः** एकाग्रचित्त होकर परिश्रम करें, सफलता अवश्य मिलेगी।




हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

## वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि! अद्य मया काश्चन विचित्राः वार्ताः आनीताः। बेङ्गलूरुनगरे एकेन नरेण पितामहस्य पुरातन-घूर्णन-दूरभाषयन्त्रं कृत्रिम- बुद्धि-साहाय्यकरूपेण परिवर्तितम्!

**नन्दिनी-** अहो! तेन पुरातन-नूतनयोः सुन्दरः सङ्गमः कृतः। अन्या वार्ता अपि श्रुता मया। प्रथमवारं पित्रा नवजातः शिशुः धृतः, तस्य भावुकं चलचित्रम् अन्तर्जाले कोटिभिः जनैः दृष्टम्।

**काव्या-** तत् तु अतीव हृदयस्पर्शि! गया-मण्डले ग्रामवासिभिः पाषाणानाम् अपि नामानि दत्तानि! एषा पञ्चशताब्द-प्राचीना परम्परा तैः पालिता।

**नन्दिनी-** पाषाणानां नामानि? अतीव विस्मयकरम्! परं यात्रायाम् अपि विस्मयः दृष्टः। रेलयाने यात्रिभिः नृत्यं कृतम्! तत् दृष्ट्वा सामाजिक-माध्यमेषु विवादः आरब्धः।

**काव्या-** सार्वजनिक-स्थानेषु जनाः नियमं विस्मृतवन्तः सन्ति। बेङ्गलूरु-नगरस्य आन्तरिक-रेलयाने सर्वैः यात्रिभिः स्व-दूरभाषेषु केवलं लघु-चलचित्राणि दृष्टानि! अन्तर्जाल-व्यसनं तैः स्पष्टम् एव प्रदर्शितम्।

**नन्दिनी-** सत्यम्, अन्तर्जाल-व्यसनं महती समस्या जाता। परम् अन्यत्र महान् उत्साहः अपि दृष्टः। भारतस्य क्रीडा-विजयानन्तरं एकेन ब्रिटिश-देशीय-नरेण अपि देहल्यां 'भारत-द्वार'-स्मारके भारतीयैः सह उत्सवः आचरितः।

**काव्या-** सः तु भारतीय-क्रीडा-प्रशंसकः जातः! परम् अन्यत्र एकः अन्तर्जाल-चलचित्र-निर्माता विमान-समस्याकारणैः अवरुद्धः। तेन सामान्य- कक्षायां यात्रा न कृता, अतः अन्तर्जाले सः जनैः निन्दितः।

**नन्दिनी-** तस्य अहङ्कारः एव तेन प्रदर्शितः। अन्य-देशस्य वार्ता अपि श्रुता मया। अमेरिका-देशे 'बिल्-कुर्तिस'-महोदयेन द्वादश-वर्षानन्तरं विचित्रात् वार्ता-कार्यक्रमात् निवृत्तिः प्राप्ता।

**काव्या-** तस्य स्वरः अतीव प्रसिद्धः आसीत्। तस्मिन् एव देशे, 'पोर्त्लान्द्'-नगरे जनैः सर्पैः सह योग-अभ्यासः आरब्धः! भयं दूरीकर्तुं तैः सर्प-योगः कृतः।

**नन्दिनी-** सर्पैः सह योगः? एतत् तु भयङ्करम्! परम् ओडिशा-राज्ये 'अंशुमालिनी'-नामिकया महिलया वक्रसूची-कौशलेन षट्-विश्वविक्रमाः प्राप्ताः।

**काव्या-** तया महान् परिश्रमः कृतः! भारत-पाकिस्थान-क्रीडायै अपि जनाः महान्तम् उत्साहं दर्शितवन्तः सन्ति। विमानानां मूल्यम् अतीव वर्धितम्।

**नन्दिनी-** क्रीडायै जनाः किमपि कुर्वन्ति। परम् एकया महिलया रात्रौ श्मशाने भोजनम् आहूतम्! एषा वार्ता भोजन-वितरकेण अन्तर्जाले प्रकाशिता।

**काव्या-** श्मशाने भोजनम्? एषा तु भयानका वार्ता! भारतस्य एकस्मिन् रेल-स्थानके अपि रेलयानस्य दीपाः स्वयम् एव निर्वापिताः। एतस्य स्थानकस्य रहस्यम् अद्यापि न ज्ञातम्।

**नन्दिनी-** रहस्यमयी खलु एषा घटना। 'नवयार्क'-नगरे तु सर्वकारस्य नियमः भिन्नः जातः। तत्र मार्गे यत्र कुत्र अपि पद-गमनं वैधीकृतम्! जनैः आरक्षकेभ्यः मुक्तिः प्राप्ता।

**काव्या-** जनेभ्यः मुक्तिः प्राप्ता, परं 'कोलोराडो'-राज्ये एकेन गजेन प्राणिसङ्ग्रहालयात् मोचनाय न्यायालये आख्यायिका नीता! तेन 'विधिक-व्यक्तित्वम्' याचितम्।

**नन्दिनी-** अहो! गजेन अपि न्यायः याचितः! एताः सर्वाः अतीव विचित्राः वार्ताः। श्वः पुनः मेलिष्यावः। नमो नमः।